# Dakshakritam Jagannatha Stotram

# दक्षकृतं जगन्नाथस्तोत्रम्

## Document Information

Text title : Dakshakritam Jagannatha Stotram

File name : dakShakRRitaMjagannAthastotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | puruShottamakhaNDa | adhyAya 46/24-31||

Latest update : May 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 5, 2025

*sanskritdocuments.org*

# दक्षकृतं जगन्नाथस्तोत्रम्

दक्ष उवाच ।
देवदेव जगन्नाथ सहजानन्दनिर्मल ।
संसारार्णवसम्मग्नांस्त्राहि नः परमेश्वर ॥ २४॥

नानाविधैश्च सन्तापैः सन्तप्तान्मानवानिमान् ।
ममानुक्रोशबुध्या वै शुभदृष्ट्याऽमृतेन च ॥ २५॥

सन्तर्पय तृणाञ्छुष्कान्कृष्णमेघ नमोऽस्तुते ।
कलिकल्मषसम्मूढानुद्धर्तुं जगतां पते ॥ २६ ॥

अवतारोऽयमेतस्मिन्नीलाचलगुहान्तरे ।
चिरकालप्ररूढानां दुस्त्यजानां महांहसाम् ॥ २७॥

राशिं दग्धुं त्वमेवेशो दीनानाथकृपाकर ।
त्वद्दर्शनमहायोगे यमाद्यष्टाङ्गवर्जिते ॥ २८॥

येषां मतिः समुत्पन्ना चतुर्वर्गैकसाधने ।
न ते शोचन्ति दुष्पारे भवारण्ये महाभये ॥ २९॥

कर्मानपेक्षं देवेश नात्मज्ञानं विमोचकम् ।
इदं ते दर्शनं नाथ विना कर्मापि मोचयेत् ॥ २.४६.३०॥

जय कृष्ण जयेशान जयाक्षर जयाव्यय ।
प्रसीदानुगृहाणेमान्दीनान्मूढान्विचेतसः ॥ ३१॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे पुरुषोत्तमजगन्नाथमाहात्म्ये
षड्चत्वारिंशाध्यायान्तर्गतं दक्षकृतं जगन्नाथस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । पुरुषोत्तमखण्ड । अध्याय ४६/२४-३१ ॥

skandapurANa . vaiShNavakhaNDa . puruShottamakhaNDa . adhyAya 46/24-31..

Proofread by PSA Easwaran

*Dakshakritam Jagannatha Stotram*

pdf was typeset on May 5, 2025

Please send corrections to *sanskrit@cheerful.com*